# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

## ॥अथ सप्तम काण्डे तृतीयः प्रश्नः॥

हरिः ओम्॥ प्रजवं वा एतेन यन्ति यद्दशममहः पापावहीयं वा एतेन भवन्ति यद्दशममहर्यो वै प्रजवं यतामपथेन प्रतिपद्यते य स्थाणुग्ं हन्ति यो भ्रेषं न्येति स हीयते स यो वै दशमेऽहन्नविवाक्य उपहन्यते स हीयते तस्मै य उपहताय व्याह तमेवाऽन्वारभ्य समश्नुतेऽथ यो व्याह सः [१] हीयते तस्माद्दशमेऽहन्नविवाक्य उपहताय न व्युच्यमथो खल्वाहुर्यङ्ञस्य वै समृद्धेन देवाः सुवर्गं लोकमायन् यङ्ञस्य व्यृद्धेनाऽसुरान्पराऽभावयन्निति यत्खलु वै यङ्ञस्य समृद्धं तद्यजमानस्य यद्व्यृद्धं तद्भ्रातृव्यस्य स यो वै दशमेऽहन्नविवाक्य उपहन्यते स एवाऽति रेचयति ते ये बाह्या दृशीकवः [२] स्युस्ते वि ब्रूयुर्यदि तत्र न विन्देयुरन्तः सदसाद्व्युच्यं यदि तत्र न विन्देयुर्गृहपतितना व्युच्यं तद्व्युच्यमेवाऽथ वा एतथ्सर्पराङ्ञिया ऋग्भिः स्तुवन्तीयं वै सर्पतो राङ्ञी यद्वा अस्याङ्किञ्चाऽर्चन्ति यदानृचुस्तेनेयग्ं सर्पराङ्ञी ते यदेव किञ्च वाचाऽऽनृचुर्यदतोऽध्यर्चितार- [३] स्तदुभयमाप्त्वाऽवरुध्योत्तिष्ठामेति ताभिर्मनसा स्तुवते न वा इमामश्वरथो नाऽश्वतरीरथः सद्यः पर्याप्तुमर्हति मनो वा इमाग्ं सद्यः पर्याप्तुमर्हति मनः परिभवितुमथ ब्रह्म वदन्ति परिमिता वा ऋचः परिमितानि सामानि परिमितानि यजूग्ष्यथैतस्यैवाऽन्तो नाऽस्ति यद्ब्रह्म तत्प्रतिगृणत आ चक्षीत स प्रतिगरः॥[४]

*व्याह स दृशीकवोऽर्चितरस्स एकञ्च॥7.3.1॥*

ब्रह्मवादिनो वदन्ति किं द्वादशाहस्य प्रथमेनाऽह्नर्त्विजां यजमानो वृङ्क्ते इति तेज इन्द्रियमिति किं द्वितीयेनेति प्राणानन्नाद्यमिति किं तृतीयेनेति त्रीनिमाँल्लोकानिति किं चतुर्थेनेति चतुष्पदः पशूनिति किं पञ्चमेनेति पञ्चाक्षरां पङ्क्तिमिति किग्ं षष्ठेनेति षड्ऋतूनिति किग्ं सप्तमेनेति सप्तपदाग्ं शाक्वरीमिति [५] किमष्टमेनेत्यष्टाक्षरां गायत्रीमिति किं नवमेनेति त्रिवृतग्ग् स्तोममिति किं दशमेनेति दशाक्षरां विराजमिति किमेकादशेनेत्येकादशाक्षरां त्रिष्टुभमिति किं द्वादशेनेति द्वादशाक्षरां जगतीमित्येतावद्वा अस्ति यावदेतद्यावदेवाऽस्ति तदेषां वृङ्क्ते॥[६]

*शाक्करीमित्येक चत्वारिग्ंशच्च॥7.3.2॥*

एष वा आप्तो द्वादशाहो यत्त्रयोदशरात्रः समानग्ग् ह्येतदहर्यत्प्रायणीयश्चोदयनीयश्च त्र्यतिरात्रो भवति त्रय इमे लोका एषाँल्लोकानामाप्त्यै प्राणो वै प्रथमोऽतिरात्रो व्यानो द्वितीयोऽपानस्तृतीयः प्राणापानोदानेष्वेवाऽन्नाद्ये प्रति तिष्ठन्ति सर्वमायुर्यन्ति य एवं विद्वाग्ंसस्त्रयोदशरात्रमासते तदाहुर्वाग्वा एषा विता [७] यद्द्वादशाहस्तां वि च्छिन्द्युर्यन्मध्येऽतिरात्रङ्कुर्युरुपदासुका गृहपतेर्वाक्स्यादुपरिष्टाच्छन्दोमानां महाव्रतङ्कुर्वन्ति संततामेव वाचमव रुन्धतेऽनुपदासुका गृहपतेर्वाग्भवति पशवो वै छन्दोमा अन्नं महाव्रतं यदुपरिष्टाच्छन्दोमानां महाव्रतङ्कुर्वन्ति पशुषु चैवाऽन्नाद्ये च प्रति तिष्ठन्ति॥[८]

*विता त्रिचत्वारिग्ंशच्च॥7.3.3॥*

आदित्या अकामयन्तोभयोर्लोकयोर्ऋध्नुयामेति त एतं चतुर्दशरात्रमपश्यन्तमाऽहरन्तेनाऽयजन्त ततो वै त उभयोर्लोकयोराध्नुवन्नस्मिग्ग्श्चामुष्मिग्ग्श्च य एवं विद्वाग्श्चतुर्दशरात्रमासत उभयोरेव लोकयोर्ऋध्नुवन्त्यस्मिग्ग्श्चामुष्मिग्ग्श्च चतुर्दशरात्रो भवति सप्त ग्राम्या ओषधयः सप्ताऽऽरण्या उभयीषामवरुद्ध्यै यत्पराचीनानि पृष्ठानि भवन्त्यमुमेव तैर्लोकमभि जयन्ति यत्प्रतीचीनानि पृष्ठानि [९] भवन्तीममेव तैर्लोकमभि जयन्ति त्रयस्त्रिग्ंशौ मध्यत स्तोमौ भवतः साम्राज्यमेव गच्छन्त्यधिराजौ भवतोऽधिराजा एव समानानां भवन्त्यतिरात्रावभितो भवतः परिगृहीत्यै॥[१०]

*पृष्ठानि चतुस्त्रिग्ंशच्च॥7.3.4॥*

प्रजापतिः सुवर्गं लोकमैत्तन्देवा अन्वायन्तानादित्याश्च पशवश्चाऽन्वायन्ते देवा अब्रुवन् यान् पशूनुपाजीविष्म त इमेऽन्वाग्मन्निति तेभ्य एतञ्चतुर्दशरात्रं प्रत्यौहन्त आदित्याः पृष्ठैः सुवर्गँल्लोकमाऽरोहन्त्र्यहाभ्यामस्मिँल्लोके पशून्प्रत्यौहन्पृष्ठैरादित्या अमुष्मिँल्लोक आर्ध्नवन्त्र्यहाभ्यामस्मिँ- [११] ल्लोके पशवो य एवं विद्वाग्ंसश्चतुर्दशरात्रमासत उभयोरेव लोकयोर्ऋध्नुवन्त्यस्मिग्ग्श्चामुष्मिग्ग्श्च पृष्ठैरेवाऽमुष्मिँल्लोक ऋध्नुवन्ति त्र्यहाभ्यामस्मिँल्लोके ज्योतिर्गौरायुरिति त्र्यहो भवतीयं वाव ज्योतिरन्तरिक्षङ्गौरसावायुरिमानेव लोकानभ्यारोहन्ति यदन्यतः पृष्ठानि स्युर्विविवधग्ग् स्यान्मध्ये पृष्ठानि भवन्ति सविवधत्वायौ- [१२] जो वै वीर्यं पृष्ठान्योज एव वीर्यं मध्यतो दधते बृहद्रथंतराभ्यां यन्तीयं वाव रथंतरमसौ बृहदाभ्यामेव यन्त्यथो अनयोरेव प्रति तिष्ठन्त्येते वै यङ्ञस्याऽञ्जसायनी स्त्रुती

ताभ्यामेव सुवर्गँल्लोकं यन्ति पराञ्चो वा एते सुवर्गं लोकमभ्यारोहन्ति ये पराचीनानि पृष्ठान्युपयन्ति प्रत्यङ्त्र्यहो भवति प्रत्यवरूढ्या अथो प्रतिष्ठित्या उभयोर्लोकयोर्ऋद्ध्वोत्तिष्ठन्ति चतुर्दशैतास्तासां या दश दशाक्षरा विराडन्नं विराड्विराजैवाऽन्नाद्यमव रुन्धते याश्चतस्त्रश्चतस्रो दिशो दिक्ष्वेव प्रति तिष्ठन्त्यतिरात्रावभितो भवतः परिगृहीत्यै॥[१३]

*आर्धुवन्त्र्यहाभ्यमस्मिन्थ्सविवधत्वाय प्रतिष्ठित्या एकत्रिग्ंशच्च॥7.3.5॥*

इन्द्रो वै सदृङ्देवताभिरासीथ्स न व्यावृतमगच्छथ्स प्रजापतिमुपाऽधावत्तस्मा एतं पञ्चदशरात्रं प्राऽयच्छत्तमाहरत्तेनाऽयजत ततो वै सोऽन्याभिर्देवताभिर्व्यावृतमगच्छद्य एवं विद्वाग्ंसः पञ्चदशरात्रमासते व्यावृतमेव पाप्मना भ्रातृव्येण गच्छन्ति ज्योतिर्गौरायुरिति त्र्यहो भवतीयं वाव ज्योतिरन्तरिक्ष- [१४] ङ्गौरसावायुरेष्वेव लोकेषु प्रति तिष्ठन्त्यसत्त्रं वा एतद्यदच्छन्दोमं यच्छन्दोमा भवन्ति तेन सत्त्रं देवता एव पृष्ठैरव रुन्धते पशूङ्छन्दोमैरोजो वै वीर्यं पृष्ठानि पशवश्छन्दोमा ओजस्येव वीर्ये पशुषु प्रति तिष्ठन्ति पञ्चदशरात्रो भवति पञ्चदशो वज्रो वज्रमेव भ्रातृव्येभ्यः प्र हरन्त्यतिरात्रावभितो भवत इन्द्रियस्य परिगृहीत्यै॥[१५]

*अन्तरिक्षमिन्द्रियस्यैकञ्च॥7.3.6॥*

इन्द्रो वै शिथिल इवाऽप्रतिष्ठित आसीथ्सोऽसुरेभ्योऽबिभेथ्स प्रजापतिमुपाऽधावत्तस्मा एतं पञ्चदशरात्रं वज्रं प्राऽयच्छत्तेनाऽसुरान्पराभाव्य विजित्य श्रियमगच्छदग्निष्टुता पाप्मानं निरदहत पञ्चदशरात्रेणौजो बलमिन्द्रियं वीर्यमात्मन्नधत्त य एवं विद्वाग्ंसः

पञ्चदशरात्रमासते भ्रातृव्यानेव पराभाव्य विजित्य श्रियं गच्छन्त्यग्निष्टुता पाप्मानन्नि- [१६] र्दहन्ते पञ्चदशरात्रेणौजो बलमिन्द्रियं वीर्यमात्मन्दधत एता एव पशव्याः पञ्चदश वा अर्धमासस्य रात्रयोऽर्धमासशः संवथ्सर आप्यते संवथ्सरं पशवोऽनु प्र जायन्ते तस्मात्पशव्या एता एव सुवर्ग्याः पञ्चदश वा अर्धमासस्य रात्रयोऽर्धमासशः संवथ्सर आप्यते संवथ्सरः सुवर्गो लोकस्तस्माथ्सुवर्ग्या ज्योतिर्गौरायुरिति त्र्यहो भवतीयं वाव ज्योतिरन्तरिक्ष- [१७] ङ्गौरसावायुरिमानेव लोकानभ्यारोहन्ति यदन्यतः पृष्ठानि स्युर्विविवधग्ग् स्यान्मध्ये पृष्ठानि भवन्ति सविवधत्वायौजो वै वीर्यं पृष्ठान्योज एव वीर्यं मध्यतो दधते बृहद्रथंतराभ्यां यन्तीयं वाव रथंतरमसौ बृहदाभ्यामेव यन्त्यथो अनयोरेव प्रति तिष्ठन्येते वै यङ्ञस्याऽञ्जसायनी स्रुती ताभ्यामेव सुवर्गँल्लोकं [१८] यन्ति पराञ्चो वा एते सुवर्गँल्लोकमभ्यारोहन्ति ये पराचीनानि पृष्ठान्युपयन्ति प्रत्यङ्त्र्यहो भवति प्रत्यवरूढ्या अथो प्रतिष्ठित्या उभयोर्लोकयोर्ऋद्ध्वोत्तिष्ठन्ति पञ्चदशौतास्तासां या दश दशाक्षरा विराडन्नं विराड्विराजैवाऽन्नाद्यमव रुन्धते याः पञ्च पञ्च दिशो दिक्ष्वेव प्रति तिष्ठन्त्यतिरात्रावभितो भवत इन्द्रियस्य वीर्यस्य प्रजायै पशूनां परिगृहीत्यै॥[१९]

*गच्छन्त्यग्निष्टुता पाप्मानन्निरन्तरिक्षँल्लोकं प्रजायै द्वे च॥7.3.7॥*

प्रजापतिरकामयताऽन्नादः स्यामिति स एतग्ं सप्तदशरात्रमपश्यत्तमाऽहरत्तेनाऽयजत ततो वै सोऽन्नादोऽभवद्य एवं विद्वाग्ंसः सप्तदशरात्रमासतेऽन्नादा एव भवन्ति पञ्चाहो भवति पञ्च वा ऋतवः संवथ्सर ऋतुष्वेव संवथ्सरे प्रति तिष्ठन्त्यथो

पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाऽव रुन्धतेऽसन्नं वा एत- [२०] द्यदच्छन्दोमं यच्छन्दोमा भवन्ति तेन सन्नं देवता एव पृष्ठैरव रुन्धते पशूङ्छन्दोमैरोजो वै वीर्यं पृष्ठानि पशवश्छन्दोमा ओजस्येव वीर्येपशुषु प्रति तिष्ठन्ति सप्तदशरात्रो भवति सप्तदशः प्रजापतिः प्रजापतेराप्त्या अतिरात्रावभितो भवतोऽन्नाद्यस्य परिगृहीत्यै॥[२१]

*एतथ्सप्तत्रिग्ं शच्च॥7.3.8॥*

सा विराड्विक्रम्याऽतिष्ठद्ब्रह्मणा देवेष्वन्नेनाऽसुरेषु ते देवा अकामयन्तोभयग्ं सं वृञ्जीमहि ब्रह्म चाऽन्नं चेति त एता विग्ंशतिग्ं रात्रीरपश्यन्ततो वै त उभयग्ं समवृञ्जत ब्रह्म चाऽन्नञ्च [२२] ब्रह्मवर्चसिनोऽन्नादा अभवन् य एवं विद्वाग्ंस एता आसत उभयमेव सं वृञ्जते ब्रह्म चान्नं च ब्रह्मवर्चसिनोऽन्नादा भवन्ति द्वे वा एते विराजौ तयोरेव नाना प्रति तिष्ठन्ति विग्ंशो वै पुरुषो दश हस्त्या अङ्गुलयो दश पद्या यावानेव पुरुषस्तमाप्त्वोत्तिष्ठन्ति ज्योतिर्गौरायुरिति त्र्यहा भवन्तीयं वाव ज्योतिरन्तरिक्षं गौरसावायुरिमानेव लोकानभ्यारोहन्त्यभिपूर्वं त्र्यहा भवन्त्यभिपूर्वमेव सुवर्गँ [२३] ल्लोकमभ्यारोहन्ति यदन्यतः पृष्ठानि स्युर्विविवधग्ग् स्यान्मध्ये पृष्ठानि भवन्ति सविवधत्वायौजो वै वीर्यं पृष्ठान्योज एव वीर्यं मध्यतो दधते बृहद्रथंतराभ्यां यन्तीयं वाव रथंतरमसौ बृहदाभ्यामेव यन्त्यथो अनयोरेव प्रति तिष्ठन्त्येते वै यज्ञस्याऽञ्जसायनी स्रुती ताभ्यामेव सुवर्गँल्लोकं यन्ति पराञ्चो वा एते सुवर्गँल्लोकमभ्यारोहन्ति ये पराचीनानि पृष्ठान्युपयन्ति प्रत्यङ्त्र्यहो भवति प्रत्यवरूढ्या अथो प्रतिष्ठिया उभयोर्लोकयोरृद्ध्वोत्तिष्ठन्त्यतिरात्रावभितो भवतो ब्रह्मवर्चसस्यान्नाद्यस्य परिगृहीत्यै॥[२४]

*वृञ्जते ब्रह्म चाऽन्नञ्च सुवर्गमेते सुवर्गन्त्रयोविग्ंशतिश्च॥7.3.9॥*

असावादित्योऽस्मिँल्लोक आसीत्तं देवाः पृष्टैः परिगृह्य सुवर्गँल्लोकमगमयन्परैरवस्तात्पर्यगृह्णन्दिवाकीर्त्येन सुवर्गे लोके प्रत्यस्थापयन्परैः परस्तात्पर्यगृह्णन्पृष्टैरुपावारोहन्थ्स वा असावादित्योऽमुष्मिँल्लोके परैरुभयतः परिगृहीतो यत्पृष्ठानि भवन्ति सुवर्गमेव तैर्लोकं यजमाना यन्ति परैरवस्तात्परि गृह्णन्ति दिवाकीर्त्येन [२५] सुवर्गे लोके प्रति तिष्ठन्ति परैः परस्तात्परि गृह्णन्ति पृष्टैरुपावरोहन्ति यत्परे परस्तान्न स्युः पराञ्चः सुवर्गाल्लोकान्निष्पद्येरन् यदवस्तान्न स्युः प्रजा निर्दहेयुरभितो दिवाकीर्त्यं परःसामानो भवन्ति सुवर्ग एवैनाँल्लोक उभयतः परि गृह्णन्ति यजमाना वै दिवाकीर्त्यग्ं संवथ्सरः परःसामानोऽभितो दिवाकीर्त्यं परःसामानो भवन्ति संवथ्सर एवोभयतः प्रति तिष्ठन्ति [२६] पृष्ठं वै दिवाकीर्त्यं पार्श्वे परःसामानोऽभितो दिवाकीर्त्यं परःसामानो भवन्तितस्मादभितःपृष्ठं पार्श्वे भूयिष्ठा ग्रहा गृह्यन्ते भूयिष्ठग्ं शस्यते यङ्ञस्यैव तन्मध्यतो ग्रन्थिं ग्रथ्नन्त्यविस्रग्ंसाय सप्त गृह्यन्ते सप्त वै शीर्षण्याः प्राणाः प्राणानेव यजमानेषु दधति यत्पराचीनानि पृष्ठानि भवन्त्यमुमेव तैर्लोकमभ्यारोहन्ति यदिमँल्लोकन्न [२७] प्रत्यवरोहेयुरुद्वा माद्येयुर्यजमानाः प्र वा मीयेरन् यत्प्रतीचीनानि पृष्ठानि भवन्तीममेव तैर्लोकं प्रत्यवरोहन्त्यथो अस्मिन्नेव लोके प्रति तिष्ठन्त्यनुन्मादायेन्द्रो वा अप्रतिष्ठित आसीथ्स प्रजापतिमुपाऽधावत्तस्मा एतमेकविग्ंशतिरात्रं प्राऽयच्छत्तमाऽहरत्तेनाऽयजत ततो वै स प्रत्यतिष्ठद्ये बहुयाजिनोऽप्रतिष्ठिताः [२८] स्युस्त एकविग्ंशतिरात्रमासीरन्द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य

एकविग्ंश एतावन्तो वै देवलोकास्तेष्वेव यथापूर्वं प्रति तिष्ठन्त्यसावादित्यो न व्यरोचत स प्रजापतिमुपाऽधावत्तस्मा एतमेकविग्ंशतिरात्रं प्राऽयच्छत्तमाऽहरत्तेनाऽयजत ततो वै सोऽरोचत य एवं विद्वाग्ंस एकविग्ंशतिरात्रमासते रोचन्त एवैकविग्ंशतिरात्रो भवति रुग्वा एकविग्ंशो रुचमेव गच्छन्त्यथो प्रतिष्ठामेव प्रतिष्ठा ह्येकविग्ंशोऽतिरात्रावभितो भवतो ब्रह्मवर्चसस्य परिगृहीत्यै॥[२९]

*गृह्णन्ति दिवाकीर्त्यैवोभयतो नाऽप्रतिष्ठिता आसत एकविग्ंशतिश्च॥7.3.10॥*

अर्वाङ्यङ्ञः सं क्रामत्वमुष्मादधि मामभि। ऋषीणां यः पुरोहितः॥ निर्देवं निर्वीरं कृत्वा विष्कन्धन्तस्मिन् हीयतां योऽस्मान्द्वेष्टि। शरीरं यङ्ञशमलं कुसीदं तस्मिन्थ्सीदतु योऽस्मान्द्वेष्टि॥ यङ्ञ यङ्ञस्य यत्तेजस्तेन सङ्क्राम मामभि। ब्राह्मणानृत्विजो देवान्यङ्ञस्य तपसा ते सवाऽहमा हुवे॥ इष्टेन पक्वमुप [३०] ते हुवे सवाऽहम्। सं ते वृञ्जे सुकृतग्ं सं प्रजां पशून्॥ प्रैषान्थ्सामिधेनीराघारावाज्यभागावाश्रुतं प्रत्याश्रुतमा शृणामि ते।प्रयाजानूयाजान्थ्स्विष्टकृतमिडामाशिष आ वृञ्जे सुवः॥ अग्निनेन्द्रेण सोमेन सरस्वत्या विष्णुना देवताभिः। याज्यानुवाक्याभ्यामुप ते हुवे सवाऽहं यङ्ञमा ददे ते वषट्कृतम्॥ स्तुतग्ं शस्त्रं प्रतिगरं ग्रहमिडामाशिष [३१] आ वृञ्जे सुवः। पत्नीसंयाजानुप ते हुवे सवाऽहग्ंसमिष्टयजुरा ददे तव॥ पशून्थ्सुतं पुरोडाशान्थ्सवनान्योत यङ्ञम्। देवान्थ्सेन्द्रानुप ते हुवे सवाहमग्निमुखान्थ्सोमवतो ये च विश्वे॥[३२]

*उप ग्रहमिडामाशिषो द्वात्रिग्ं शच्च॥7.3.11॥*

भूतं भव्यं भविष्यद्वषट्थ्स्वाहा नम ऋक्साम यजुर्वषट्थ्स्वाहा नमो गायत्री त्रिष्टुब्जगती वषट्थ्स्वाहा नमः पृथिव्यन्तरिक्षं द्यौर्वषट्थ्स्वाहा नमोऽग्निर्वायुः सूर्यो वषट्थ्स्वाहा नमः प्राणो व्यानोऽपानो वषट्थ्स्वाहा नमोऽन्नङ्कृषिर्वृष्टिर्वषट्थ्स्वाहा नमः पिता पुत्रः पौत्रो वषट्थ्स्वाहा नमो भूर्भुवः सुवर्वषट्थ्स्वाहा नमः॥[३३]

*भुवश्चत्वारि च॥7.3.12॥*

आ मे गृहा भवन्त्वा प्रजा म आ मा यङ्ञो विशतु वीर्यावान्। आपो देवीर्यङ्ञिया माऽऽ विशन्तु सहस्रस्य मा भूमा मा प्र हासीत्॥ आ मे ग्रहो भवत्वा पुरोरुक्स्तुतशस्त्रे मा विशताग्ं समीची। आदित्या रुद्रा वसवो मे सदस्याः सहस्रस्य मा भूमा मा प्र हासीत्॥ आ माऽग्निष्टोमो विशतूक्थ्यश्चाऽतिरात्रो माऽऽ विशत्वापिशर्वरः। तिरोअह्निया मा सुहुता आ विशन्तु सहस्रस्य मा भूमा मा प्र हासीत्॥[३४]

*अग्निष्टोमो विशत्वष्टादश च॥7.3.13॥*

अग्निना तपोऽन्वभवद्वाचा ब्रह्म मणिना रूपाणीन्द्रेण देवान् वातेन प्राणान्थ्सूर्येण द्याञ्चन्द्रमसा नक्षत्राणि यमेन पितॄन्राङ्ञा मनुष्यान्फलेन नादेयानजगरेण सर्पान्व्याघ्रेणाऽऽरण्यान्पशून्छ्येनेन पतत्रिणो वृष्णाऽश्वानृषभेण गा बस्तेनाऽजा वृष्णिनाऽवीर्व्रीहिणाऽन्नानि यवेनौषधीर्न्यग्रोधेन वनस्पतीनुदुम्बरेणोर्जं गायत्रिया

छन्दाग्ंसि त्रिवृता स्तोमान्ब्राह्मणेन वाचम्॥[३५]

*ब्राह्मणेनैकञ्च॥7.3.14॥*

स्वाहाऽऽधिमाधीताय स्वाहा स्वाहाऽऽधीतं मनसे स्वाहा स्वाहा मनः प्रजापतये स्वाहा काय स्वाहा कस्मै स्वाहा कतमस्मै स्वाहाऽदित्यै स्वाहाऽदित्यै मह्यै स्वाहाऽदित्यै सुमृडीकायै स्वाहा सरस्वत्यै स्वाहा सरस्वत्यै बृहत्यै स्वाहा सरस्वत्यै पावकायै स्वाहा पूष्णे स्वाहा पूष्णे प्रपथ्याय स्वाहा पूष्णे नरंधिषाय स्वाहा त्वष्ट्रे स्वाहा त्वष्ट्रे तुरीपाय स्वाहा त्वष्ट्रे पुरुरूपाय स्वाहा विष्णवे स्वाहा विष्णवे निखुर्यपाय स्वाहा विष्णवे निभूयपाय स्वाहा सर्वस्मै स्वाहा॥[३६]

*पुरुरूपाय स्वाहा दश च॥7.3.15॥*

दद्भ्यः स्वाहा हनूभ्याग् स्वाहोष्ठाभ्याग् स्वाहा मुखाय स्वाहा नासिकाभ्याग् स्वाहाऽक्षीभ्याग् स्वाहा कर्णाभ्याग् स्वाहा पार इक्षवोऽवार्येभ्यः पक्ष्मभ्यः स्वाहाऽवार इक्षवः पार्येभ्यः पक्ष्मभ्यः स्वाहा शीर्ष्णे स्वाहा भ्रूभ्याग् स्वाहा ललाटाय स्वाहा मूर्ध्ने स्वाहा मस्तिष्काय स्वाहा केशेभ्यः स्वाहा वहाय स्वाहा ग्रीवाभ्यः स्वाहा स्कन्धेभ्यः स्वाहा कीकसाभ्यः स्वाहा पृष्टीभ्यः स्वाहा पाजस्याय स्वाहा पार्श्वाभ्याग् स्वाहा– [३७] ऽग्ंसाभ्याग् स्वाहा दोषभ्याग् स्वाहा बाहुभ्याग् स्वाहा जङ्घाभ्याग् स्वाहा श्रोणीभ्याग् स्वाहोरुभ्याग् स्वाहाऽष्ठीवद्भ्याग् स्वाहा जङ्घाभ्याग् स्वाहा भसदे स्वाहा शिखण्डेभ्यः स्वाहा वालधानाय स्वाहाऽण्डाभ्याग् स्वाहा शेपाय स्वाहा रेतसे स्वाहा प्रजाभ्यः स्वाहा प्रजननाय स्वाहा पद्भ्यः

स्वाहा शफेभ्यः स्वाहा लोमभ्यः स्वाहा त्वचे स्वाहा लोहिताय स्वाहा माग्ंसाय स्वाहा स्नावभ्यः स्वाहाऽस्थभ्यः स्वाहा मज्जभ्यः स्वाहाऽङ्गेभ्यः स्वाहाऽऽत्मने स्वाहा सर्वस्मैस्वाहा॥[३८]

*पार्श्वाभ्याग्ं स्वाहा मज्जभ्यस्स्वाहा षट्च॥7.3.16॥*

अञ्ज्येताय स्वाहाऽञ्जिसक्थाय स्वाहा शितिपदे स्वाहा शितिककुदेस्वाहा शितिरन्ध्राय स्वाहा शितिपृष्ठाय स्वाहा शित्यग्ंसाय स्वाहा पुष्पकर्णाय स्वाहा शित्योष्ठाय स्वाहा शितिभ्रवे स्वाहा शितिभसदेस्वाहा श्वेतानूकाशाय स्वाहाऽञ्जये स्वाहा ललामाय स्वाहाऽसितङ्ग्रवेस्वाहा कृष्णैताय स्वाहा रोहितैताय स्वाहाऽरुणैताय स्वाहेदृशाय स्वाहाकीदृशाय स्वाहा तादृशाय स्वाहा सदृशाय स्वाहा विसदृशाय स्वाहासुसदृशाय स्वाहा रूपाय स्वाहा सर्वस्मै स्वाहा॥[३९]

*रूपाय स्वाहा द्वे च॥7.3.17॥*

कृष्णाय स्वाहा श्वेताय स्वाहा पिशङ्गाय स्वाहा सारङ्गाय स्वाहाऽरुणायस्वाहा गौराय स्वाहा बभ्रवे स्वाहा नकुलाय स्वाहा रोहिताय स्वाहाशोणाय स्वाहा श्यावाय स्वाहा श्यामाय स्वाहा पाकलाय स्वाहा सुरूपाय स्वाहाऽनुरूपाय स्वाहा विरूपाय स्वाहा सरूपाय स्वाहा प्रतिरूपाय स्वाहा शबलाय स्वाहा कमलाय स्वाहा पृश्नये स्वाहा पृश्निसक्थाय स्वाहा सर्वस्मै स्वाहा॥[४०]

*कृष्णाय षट्चत्वारिग्ंशत्॥7.3.18॥*

ओषधीभ्यः स्वाहा मूलेभ्यः स्वाहा तूलेभ्यः स्वाहा काण्डेभ्यः स्वाहा वल्शेभ्यः स्वाहा पुष्पेभ्यः स्वाहा फलेभ्यः स्वाहा गृहीतेभ्यः स्वाहाऽगृहीतेभ्यः स्वाहाऽवपन्नेभ्यः स्वाहा शयानेभ्यः स्वाहा सर्वस्मैस्वाहा॥[४१]

*ओषधीभ्यश्चतुर्विग्ंशतिः॥7.3.19॥*

वनस्पतिभ्यः स्वाहा मूलेभ्यः स्वाहा तूलेभ्यः स्वाहा स्कन्धेभ्यः स्वाहा शाखाभ्यः स्वाहा पर्णेभ्यः स्वाहा पुष्पेभ्यः स्वाहा फलेभ्यः स्वाहा गृहीतेभ्यः स्वाहा गृहीतेभ्यः स्वाहाऽवपन्नेभ्यः स्वाहा शयानेभ्यः स्वाहा शिष्टाय स्वाहाऽतिशिष्टाय स्वाहा परिशिष्टाय स्वाहा सग्ंशिष्टाय स्वाहोच्छिष्टाय स्वाहा रिक्ताय स्वाहाऽरिक्ताय स्वाहा प्ररिक्ताय स्वाहा सग्ंरिक्ताय स्वाहोद्रिक्ताय स्वाहा सर्वस्मै स्वाहा॥[४२]

*वनस्पतिभ्यस्स्कन्धेभ्यश्शिष्टाय रिक्ताय षट्चत्वारिग्ंशत्॥7.3.20॥*

*प्रजवं ब्रह्मवादिनः किमेष वा आप्त आदित्या उभयोः प्रजापतिरन्वायन्निन्द्रो वै सहङ्क्रिन्द्रो वै शिथिलः प्रजापतिरकामयताऽन्नादस्सा विराडसावादित्योऽर्वाङ्भूतमा मेऽग्निना स्वाहाऽऽधिन्दभ्योऽज्ज्येताय कृष्णायौषधीभ्यो वनस्पतिभ्यो विग्ंशतिः॥20॥*

*प्रजवं प्रजापतिर्यदछन्दोमन्त्ते हुवे सवाऽहमोषधीभ्यो द्विचत्वारिग्ंशत्॥४२॥*

*प्रजवग्ं सर्वस्मै स्वाहा॥*

॥हरिः ओम्॥

॥श्री कृष्णार्पणमस्तु॥

॥इति सप्तम काण्डे तृतीयः प्रश्नः॥